श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री करुणाकराचार्य विरचितम्

# ॥ श्रीमुष्णम् - श्रीमदाण्डवन् चरमश्लोकसप्तकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमुष्णम् - श्रीमदाण्डवन् चरमश्लोकसप्तकम् ॥

कल्यब्दे हेमलम्बे झषगृहवसतौ भास्करे शुक्लपक्षे
    रेवत्यामिन्दुवारे सकलबुधनुतः कौलवे ब्राह्मयोगे।
द्वैतीयीके तिथौ श्रीयतिपतिसदृशो रङ्गरामानुजाख्यः
    श्रुत्यन्तश्रीसुमित्रासुतमुनिसुदृशा प्राप रङ्गेन्द्रपादू॥ १ ॥

हेमलम्बे झषे शुक्लद्वितीयायां विधौ मुनिः।
रङ्गरामानुजो भेजे स्वाचार्यचरणाम्बुजे॥ २ ॥

कलानिधौ कल्पककल्पकेऽस्मिन्
    गानार्हकण्ठेन गभीरधुर्ये।
धरां विहायाद्य गते पदं तत्
    बुधा धरेयुः कथमत्र भूमौ॥ ३ ॥

अगस्त्यवद्द्राविडलक्षणे यः
    दैवज्ञमार्गेऽप्यथ गर्ग एव।
व्यासः परः सर्वकलापटुत्वात्
    मुनित्रयं चान्यदिमं श्रितं तत्॥ ४ ॥

मीने पञ्चमवासरे मुनिरयं सिद्धिं श्रितस्सद्गुणः
    कूर्मोऽसौ निजचिन्तयैव सकलान् गोप्ता जनान् संश्रितान्।
वाराहक्षितिसञ्ज्ञया भुवि बुधैस्सानन्दमासेवितः
    सिंहास्योदितगर्जनां च सुधियां गोष्ठ्यां दधानस्सुधीः॥ ५ ॥

सत्पादत्रयविक्रमे कविवरे सक्तः कवीन् रक्षिता
    रामेणाऽथ जितान्तरङ्गललितो रङ्गेशपादू भजन्।
रामः पुण्यजनेशसेवितपदः पादूप्रभावर्धिदः
    श्रीमद्यामुनकर्षणो रसपरो व्याख्यानतस्तद्गिराम्॥ ६ ॥

www.prapatti.com

श्रीरामानुजतारलब्धसुजनिः रामानुजोऽयं नवः
कल्कीवास कलिं विधूय सततं धर्मस्य गुप्तिं दधत्।
इत्येवं दशधाऽवतारगणनां स्वस्मिन् दधानो नतान्
पायादेष मुनीश्वरः स्वदयया पश्यन् पदात् शाश्वतात्॥ ७ ॥

रङ्गलक्ष्मणे तत्पदं श्रिते सप्तकेन तं भक्तितस्स्मरन्।
रङ्गलक्ष्मणप्रत्तयाऽऽख्यया शास्त्रसाहितीवल्लभोऽनमत्॥ ८ ॥

॥ इति श्रीमुष्णम् - श्रीमदाण्डवन् चरमश्लोकसप्तकं समाप्तम्॥

www.prapatti.com